जय भारति

# वैजयन्ती

साप्ताहिकी संस्कृत पत्रिका । प्रतिभौमवासरं प्रकाश्यते ।

प्रथमो वर्षः । २२-९-५३ विजयवत्सरे भा. शु. १४ ७ सञ्चिका।

संचालकाः गलगली रामाचार्याः ] मङ्गलवारः [ संपादकः पण्ढरीनाथाचार्यः

## श्री जगद्गुरूणां शुभाशीर्वादः

### श्रीमज्जगद्गुरु शंकराचार्य महासंस्थान, शृंगेरी

श्रीगुरुभ्यो नमः

प्रचुरप्रसरया ललित-लेखमनोज्ञया नैकविध-विषयावगमनपटीयस्य अनया **वैजयन्ती**-पत्रिकया गीर्वाणवाणीरसिकानां पण्डितानां बालानां च सहायो महान् भवेत् ।

पत्रिकेयं "मधुरवाणीव" सर्वजनादृता संस्कृतसाहित्यसेवां निरन्तरं विदधती चिरमभिवर्धतामिति ।

पोष्टः शृंगेरी—कड्डूर ( मैसूर स्टेट ) ६-६-१९५३

वार्षिकं मूल्यम् ५-०-० व्ही. पी. द्वारा ५-८-० प्रत्यङ्कम् ०-२-०

पूर्णसंकेतः— संपादक **वैजयन्ती**; योगमन्दिर **बागलकोट.**

Scanned by CamScanner

# आधुनिक विद्याप्रभावः

लेखकः–श्री.चिदंबर, राजजोशी, सुरपुरम्

अयि पाठकमहाशयाः! आधुनिकविद्याप्रसारप्राबल्येन प्रचुराऽभवद्विषयलंपटता । ब्रह्मचर्यमपि नामांकितमेव न त्वाचरणे स्थितम् । अंगनानां शिक्षणबाहुल्यात् कौटुंबिककलहाः दंपत्योः त्यागपात्रिकाश्च(नोटिस्) भूरिशोऽभवन् । आयुर्वेदविज्ञानाविशेषाविष्करणप्रभावतः समुद्भूताः नानाविधाः अभूतपूर्वा रोगाः । कृषिकर्मप्रचारतया समंततो दृष्टिगोचर एव दुर्भिक्षकोलाहलः । चहापत्रपाननिराकरणोपन्यासमहिम्ना चहापत्रापणान्यभूवन् प्रचुराणि । इत्थमनेककारणांतरैः भारतनिवासिनः कष्टतामनुभवंति । अयि भो महाभागाः!आंग्लविद्यापदवीधराः केचन परराष्ट्रं गत्वा आय,सि,एस्, इत्यादि परीक्षासु समुत्तीर्णाः संतो भारतदेशं प्रत्यागत्याऽस्मद्भारतीयसदाचारमार्गान् त्यजंतः पाश्चिमात्यान् वयमनुसरेम चेदयं भरतखण्डः सुधारणां प्राप्नोतीति भणंति । अपरेच्च जल्पन्ति भारतीयसकलवर्णेषु सांकर्यकरणेन सत्यमेव भवति भारतजनपदस्य सुधारणेति घंटाघोषम् । वदंति समधिगतांग्लविद्याः काश्चिद्रमण्यश्चैवं " आर्यमहिलाः पाश्चिमात्यांगना इवाऽऽरचितकुटिलसीमंताः, शिथिलकंचुकीं सूक्ष्मतरांबरं च धारयित्वा सर्षपसदृशकुंकुमतिलकांकिताः आंग्लदेशीयोपानद्भूषिताः हस्ते पुस्तकमातपत्रं च धृत्वा मंदमारुतसेवनाय प्रत्यहं सायमुपवनविहारिण्यः, राजपथेषु त्यक्तव्रीडाः स्वेच्छया पुरुषैः सह भाषमाणाः यदि स्वातन्त्र्येण जीविकां निर्वहेयुस्तदाऽयमार्यावर्तः प्रगतिशिखरमारोहतीति । धर्मशास्त्रकोविदाः सर्वे जनाः पुनर्विवाहं विधवानां कर्तुकामा भवेयुश्चेत् भारतभाग्योदयसमयोऽस्माकं करगत इवेति बाहुमुत्धृय घोषयंति काश्चन वनिताः । अपराश्च विद्याविभूषिताः मानिन्यः विजातीयमानवैः सह स्वकीयं विवाहमेव राष्ट्रोन्नतिसाधकं मन्यंते । केचन सुधारकाः स्वधर्मतत्वज्ञानोदासीनस्वांताः श्रुतिस्मृतिपुराणसुधारसमपिबंतः सनातनं धर्ममार्गं दूषयंतः सर्वात्मना पाश्चिमात्याचरणानुकरणमेव भारतस्य परमश्रेयस्करमिति प्रजल्पन्ति ।

अयि भो महाभागाः!. इत्थमविचारकलुषितस्वांताः अनाचारभ्रष्टाश्च कष्टतामनुभवंति पुण्यजनपदेऽस्मिन् भारतीयाः । अहो किमिदमाश्चर्यं, यस्मिन् भारतदेशे परराष्ट्रागतलक्षावधिजनाः सुखभोगातिशयेन कालं यापयित्वा स्वदेशं प्रति कोटिलक्षावधिधनधान्यानि नयंति स्म, तस्मिन् देशे सुधारकजनाः अनाचारमार्गतत्पराः उद्योगविहीनाः संतः क्लेशपरंपरामनुभवंतीति निवेदयितुमतीव दोदूयते मे चेतः । हा हंत हंत पाश्चिमात्यशिक्षणेन अस्मद्भारतनिवासिनां ज्ञानं तिरोहितमेवेति भाति । पुरा किलाऽनाघ्रातांग्लविद्याध्ययनाः अस्मदीयाः स्वधर्माचरणतत्पराः संतः गीर्वाणाः इव प्रचुरसंपदभ्युदयं लब्ध्वा राष्ट्रेऽस्मिन् सुखशांतिभिः साकं कालं यापयामासुः । तथा च परराष्ट्रनिवासिनोऽपि भारतजनपदसंपदभ्युदयं भारतजनसंपदभ्युदयं दृष्ट्वा कौतुकयुक्ता भवंति स्म । सोऽयं राष्ट्रः सांप्रतं संपादितस्वराज्योऽपि महाविपत्सागरे निमग्नो दरीदृश्यते ।

अयि भोः सुधारकविद्यार्थिनः!!! उत्तिष्ठत जाग्रत, भवंतः कुत्सिताचरणमनाचरंत :स्वदेशहितसाधकाः भवंतु । स्वार्थसाधकाः विश्वासघातकाः मा भवेयुः । पूर्वापरविचारसरणिमवलम्ब्य दूरदृष्ट्या राष्ट्रकार्यमाचरन्तु । प्राचीनार्यजना इव भूतदयादिसद्गुणशालिनः देशकल्याणं साधयत । भवदीयभगिनिभ्यः संसारोपयुक्तशिक्षणं दीयतां भवद्भिः । क्षणिकस्वार्थसुखार्थं मा विक्रीयतां भवदीया श्रेयस्करी विद्या । तरुण बांधवाः !!! परं किं प्रभूतलेखनेन । त्यक्तपरावलम्बना भवंतः समाश्रितस्वावलम्बनाः भारतदेशं सकलराष्ट्रशिरोमुकुटमणिं कुर्वंत्विति सविनयं सादरमाशासे । इत्यलमति पल्लवितेन । सर्वं भद्रं भूयात् ।

Scanned by CamScanner

:: जय भारति ::

# राष्ट्रभाषा

वि. सं. भा. शु. १४. १८७५

सर्वकारेण हिन्दी एव राष्ट्रभाषा इति निर्णयः अङ्गीकृतः। परं अङ्गीकृतेन अनेन निर्णयेन को वा लाभः। किमेषा हिन्दीभाषा इंग्लीषभाषां निष्कास्य सर्वव्यवहारानपि निर्वाहयितुं समर्था ? किं तत्र राष्ट्रभाषायै अत्यावश्यकी शब्दसंपत्तिरस्ति ? किं तस्यां भाषाशास्त्रम् ? नवयुगीननवनवपदार्थसार्थाभिलापकनूतनशब्दनिर्मित्यै व्याकरणानुकूल्यं वर्तते ? किं तत्र संस्कृतिरितिहासः मानवीयहृदयानुभवनिदर्शकसाहित्यं च वरीवर्ति ? अद्यतनजगज्जीवनजीवातुभूतवैज्ञानिकवाङ्मयं विद्यते ? भौतवादमहागर्तपतिष्णुजगच्छान्तिसञ्जीवनौषधिभूतम् अध्यात्मविवेचनं वेदान्तविचारो वा किमप्युपलभ्यते ? भारतसदृशनैकभाषासंकुले राष्ट्रभाषात्वाय अत्यावश्यकसर्वप्रान्तीयभाषापोषकताबान्धव्यादिकमस्मिन् नवीनतया राष्ट्रभाषापदाभिषिक्ते हिन्दीभाषासाहित्ये किमस्ति ?। एतासां च प्रश्नपरम्पराणामेकमेवोत्तरं सदा सिद्धम् " प्रबलबहुलहिन्दीपक्षपातोध्दुराणां वदनकमलवल्गत्कान्तिसान्द्रो नकारः "। नात्र केनापि अपलापः कर्तुं शक्यः। तस्या भाषाया इमामीदृशीमशक्ततामयोग्यतां नैयून्यं हीनतां च दृष्ट्वैव पञ्चदशवर्षानन्तरं सा राष्ट्रभाषा भवेदिति निर्णीतिः। इदानीं तु अस्माभिः " धाता यथापूर्वमकल्पयत् " इतिवत् पूर्वप्रभु–पति–भाषा अर्थात् आंग्लभाषैव शरणीकरणीया। " अन्यथा शरणं नास्ति त्वमेव शरणं मम " शाधि मां त्वां प्रपन्न " मिति स्वतन्त्रैरपि स्वाभिमानिभिरपि संस्कृतसदृशसर्वसमृद्धभाषासंपन्नैरपि पूर्वद्वेषं विस्मृत्य स्वाभिमानं स्वभाषामानं च दूरात् परित्यज्य द्विशतककालमस्मान् पारतन्त्र्यपङ्के पातितवतां स्वातन्त्र्यसूर्यराहूणां हूणानामेव पुनस्साऽपवित्रतमा क्लिष्टतरा आंग्लभाषा प्रसादनीया राष्ट्रभाषासिंहासने प्रतिष्ठापनीया। येन पदे पदे गतदास्यस्मरणेन स्वातंत्र्यमपि पारतंत्र्यमिवावभासेत

कुतो वायं सर्वोपि दुर्धर्षप्रसंगः, कुतश्चतरामेवं परमुखानिरीक्षणम् ? अस्माकं राष्ट्रभाषायां सामर्थ्याभावात् ? तर्ह्येषा पञ्चदशवर्षानन्तरं कथं वा राष्ट्रभाषाधुरं वोढुं शक्ष्यति इति प्रश्नस्य हिन्दीबन्धूनाम् ' संस्कृतरुह्यायतः ' इति उत्तरं वर्वर्ति। हिन्दीवन्दिजनैरपि नैतदपलपितुं शक्यते यदधुना हिंद्यां राष्ट्रभाषात्वार्हता संपादकं छन्दोबन्धव्याकरणेतिहासराजकारणविज्ञानतत्वज्ञानादिविपुलसाहित्यं नास्त्येवेति। परं तदेषा सर्वन्यूनताऽपि भारतीयकल्पवृक्षायमाणस्य संस्कृतस्य प्रबलसाहाय्येन यथाकथंचित् परिहरिष्यते इति च समाधीयते। परं वयमत्रपृच्छामः ' कुतोवायं द्राविडः प्राणायामः '। अन्याम् आंग्लभाषां तस्याः अज्ञानपालनकर्त्रीम् सर्वथा अशक्तां कामपि राष्ट्रभाषां विधाय सा चासमर्थेति विधाय ततः संस्कृतरूपपौष्टिकच्यवनप्राश्यावलेहनेन तत्र च बलाधानप्रयत्नः, स्थितायामङ्गण एव कामधेन्वामन्यां कामपि दुग्धदोहां निरिन्द्रियां गाम् आनीय कामधेनुसाहाय्येन तां पोषयित्वा ततः क्षीरपानेच्छेव हास्यमेवोत्पादयति। **संस्कृतमय्या राष्ट्रभाषात्वापेक्षया संस्कृतस्यैव तत्वमिष्टं लाघवकरं च।** सर्वसमृद्धं सर्वथा समर्थं सर्वकार्यनिर्वाहक्षमं च संस्कृतमपहाय अपरिपूर्णहिन्दीनामकत्रिशंकुभाषाया राष्ट्रभाषात्वसाधनप्रयत्नः ' सिद्धमन्नं परित्यज्य... ' अथवा " यो ध्रुवाणि परित्यज्य अध्रुवं परिषेवते। ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च "। इति सदा सिद्धं ध्रुवं संस्कृतमपहाय असिद्धस्य अध्रुवस्य च हिन्दीसाहित्यस्य अवलम्बने सर्वथा हानिरेव स्यात्।

Scanned by CamScanner

# कालिदासचित्रितो वसन्तः

लेः– कुमारी. दवणे एम्. ए.
प्राध्यापिका, कर्णाटक कॉलेज, धारवाड.

वर्णनप्रियाः खलु कवयः। ऋतुराजो वसन्तश्च सुरसवर्णनस्य उत्कृष्टं भाजनम्। अतो नैतचित्रम् यत्सर्वासु भाषासु सर्वेषां कवीनां लेखनी वसन्तवर्णने सोत्साहं प्रवर्तत इति। आंग्लभाषायां गुर्जर–कन्नड–महाराष्ट्रादि भाषासु च मधुमासः बहुभिः कविभिः विविधैः शब्दैः चित्रितः। संस्कृतसाहित्यं वर्णने अतीव समृद्धम्। तत्र नैककविभिः ऋतुसम्राट् शब्दचित्राङ्कितः कृतः स्वेषु स्वेषु काव्येषु। कथं तर्हि कविकुलगुरुः कालिदासः वसन्तं विस्मरेत्? वसन्तवर्णनस्य नैकोऽप्यवसरः महाकवेः लक्ष्याद् भ्रष्टः। ऋतुसंहारे निखिलः षष्ठः सर्गः वसन्तमेव वर्णयतीति स्वाभाविकमेव। तथा कुमारसंभवे तृतीयसर्गे षोडशश्लोकैः रघुवंशे च नवसर्गे चतुर्विंशतिश्लोकैः वसन्तो वर्णितः। एवं मालविकाग्निमित्रस्य तृतीये अङ्के शाकुन्तलस्य च षष्ठे अङ्के अन्यत्र च अत्र तत्र तत्र सर्वासु आत्मनः कृतिषु महाकविना वसन्तः वर्णितः। ऋतुसंहार–कुमारसंभव–रघुवंशादिषु वसन्तवर्णनम् विस्तृतं हृदयग्राहि च। मेघदूते च प्रावृड्वर्णने च व्यापृतस्य कवेः वसन्तवर्णनाय नैव अवकाशः। चारुतमे शाकुन्तलेऽपि च षष्ठे अङ्के यद्यपि वसन्तः प्रसङ्गवशात् निर्दिष्टः तथापि न तस्य वर्णने कालिदासस्य तावती आस्था दृश्यते! यतः तत्र प्रियास्मृति–शल्येन विद्धहृदयस्य दुष्यन्तस्य न वसन्तवर्णने आदरः।

संस्कृतसाहित्ये सर्वासु अपि कृतिषु वसन्तवर्णनं प्रायशः एकविधमेव। नवकिसलयोल्लासः, पुष्पोद्गमः, मधुमार्गणपराणां षट्पदानां मञ्जुगीतगुञ्जारवः, चूताङ्कुरास्वादेन मत्तचित्तानां कोकिलानां मुस्वरगानं, शृङ्गारविलासाः, इत्येवमादयो रुचिररुचिराः कल्पनाः मधुमासमधिकृत्य साहित्ये प्ररूढाः। एताहशाभी रमणीयतमाभिः कल्पनाभिः स्वभावत एव सुरम्यो मधुमासः। स च कालिदासस्य हस्ते विशेषतः चारुतर एव भातीत्यत्र को विस्मयः?।

कालिदासकृतिषु तत्र तत्र उपलभ्यमानानां वसंतवर्णनानां तुलनात्मकम् आलोचनं तस्य कृतीनां पौर्वापर्यं विदुषाम् अनुमानं दृढीकरोति। यथा ऋतुसंहारं कवेः प्रथमा कृतिः रघुवंशश्च चरम इति। ऋतुसंहारे कश्चित् प्रेमी स्वप्रियायाः पुरतः सरलशब्दैः वसन्तं वर्णयति– ‘सर्वं प्रिये चारुतरं वसन्ते’ ‘ददाति सौभाग्यमयं वसन्तः’ ‘स्त्रीणामनङ्गो बहुधा स्थितोऽद्य’ “पर्युत्सकं मानसमङ्गनानाम्” इत्येवमादयः नैका उक्तयः सरलाः सुस्पष्टार्थाश्च।

दृश्यतां तावत् तस्यैव ऋतुराजस्य वर्णनं कुमारसंभवे रघुवंशे च। अत्र अधुना मधुरमधुरः जातः कवेः कल्पनाविलासः। यो मलयवातः ऋतुसंहारे केवलं नीहारपातविगमात् सुगमो भूत्वा नराणां हृदयानि अहरत् स एव अधुना खण्डितनायिकायाः दक्षिणदिशः निश्वासरूपेण उपस्थितः।

“कुबेरगुप्तां दिशमुष्णरश्मौ गन्तुं प्रवृत्ते समयं विलङ्घ्य।
दिग्दक्षिणा गन्धवहं मुखेन व्यलीकनिश्वासमिवोत्ससर्ज॥

ऋतुसंहारे नववध्वा रक्तांशुकरूपेण निर्दिष्टानि पलाशकुसुमानि कुमारे रघुवंशे च शृङ्गारोल्लासोन्मेषशालिन्या कालिदासप्रतिभया नखक्षतानीति प्रकाशितानि। कुमारे तानि कामिना वसन्तेन वनस्थलीवक्षसि कृतानि नखक्षतानि, रघुवंशे तु ‘प्रणयिनीव नखक्षतमण्डलं प्रमदया मदयार्पितलज्जया’। प्रथमकाव्ये कविदृष्टिम्

Scanned by CamScanner

अनाकर्षन् तिलकवृक्षः अनन्तरकाव्येषु वसन्तलक्ष्म्याः तिलक एव जातः। विशेषतश्च कुमारे मालविकाग्निमित्रे च अतीव रमणीयं रूपकम् अत्र परिकल्पितम् तथाहि –

कुमारे— "लग्नद्विरेफाञ्जनभक्तिचित्रं मुखे मधुश्रीस्तिलकं प्रकाश्य। रागेण बालारुणकोमलेन चूतप्रवालोष्ठमलञ्चकार" ॥

मालविकाग्निमित्रे— रक्ताशोकरुचा विशेषितगुणो बिम्बाधरालक्तकः प्रख्यातविशेषकं कुरबकं श्यामावदातरुजम् ॥ आक्रान्ता तिलकक्रियाऽपि तिलकैर्लग्नद्विरेफाञ्जनैः : सावज्ञेव मुखप्रसाधनविधौ श्रीर्माधवी योषिताम्।

चूताङ्कुरः वसन्तयोध्दुः तीक्ष्णसायकरूपेण कल्पितः ऋतुसंहारे। सा एव कल्पना कुमारे प्रगल्भतरा जाता दृश्यते।

"सद्यः प्रवालोद्गमचारुपत्रे नीते समाप्तिं नवचूतबाणे"

वसन्तः कामस्य इषुकारः। असौ स्वस्य सम्राजः मदनस्य कृते बाणान् निर्मिमीते। इषुनिर्माणे उपयुज्यमाना सामग्री तु अपूर्वैव। यतः कामचापेन साधनीयं कार्यं नातिहिंस्रम् अपितु संयोगपर्यवसायि मधुरमेव। बाणश्च मोक्तुर्नाम्ना अङ्कितव्यः। न चात्र मषीभाजनमपेक्ष्यते। यतोऽसौ मधुकरमालया अङ्कित एव।

परभृतविरुतम् अधिकृत्य उत्तरोत्तरं विवर्धमानः महाकवेः कल्पनाविलासः तावद् दृश्यताम्। ऋतुसंहारे कोकिलो मधुरैर्वचोभिर्यूनां मनो निन्दति"। मालविकाग्निमित्रे वयस्यो मधुः कोकिलकूजितव्याजेन सानुक्रोशम् अग्निमित्रं पृच्छतीव "अयि सह्या अधुनाऽस्मरकृतक्षतस्य वेदनेति"। विक्रमोर्वशीये सैव परभृत् "त्वां कामिनो मदनदूतिमुदाहरन्ति। मानावभङ्गनिपुणं त्वममोघमस्त्रम्"

तथाच कुमारे— चूताङ्कुरास्वादकषायकण्ठः पुंस्कोकिलो यन्मधुरं चुकूज। मनस्विनीमानविघातदक्षं तदेव जातं वचनं स्मरस्य ॥

चरमकृतौ रघुवंशे तु इतोऽपि हृदयग्राहितया पिको निर्दिष्टः। स्मरसन्देशश्च कण्ठरवेणैव "त्यजतमानमलं बत विग्रहैः न पुनरेति गतं चतुरं वयः" इति निगदितः।

वसन्ते न केवलं मानवानाम् अपि तु तिरश्चामपि कामः परां कोटिं प्राप्नोतीति कालिदासः असकृदाह "पर्याकुलं कुलगृहेऽपि हृदयं कृतं वधूनाम्

तथाच— "पुंस्कोकिलश्चूतरसासवेन मत्तः प्रियां चुम्बति रागहृष्टः। कूजद्द्विरेफोऽप्ययमम्बुजस्थः प्रियं प्रियायाः प्रकरोति चारु" ॥

वसन्तेन चराचरेषु प्रादुर्भावितः शृङ्गारभावः कुमारे सुष्ठु उपवर्णितः। तदानीं च मधकरो मधुकरी सहितः एकस्मिन्नेव पुष्पचषके मधु पिबति, मृगः मृगीं कण्डूयति, करेणुः स्वप्रियाय सुरभिजलम् अर्पयति, चक्रवाकश्च स्वरमणीम् अर्धोपभुक्तेन बिसेन संभावयति। वृक्षा अपि लतावधूभिः निभृतम् आलिङ्ग्यन्ते।

रघुवंशे तु केवलं मानवशृङ्गार एव उपवर्णितः। कुमारे इवात्रापि चराचरशृंगारवर्णनां मार्गयमाणानां अस्माकम् अपेक्षा विफलीभवति। तथाऽपि वादमाधुर्यात् नादसौंदर्यात् अर्थगौरवाच्च तत्रस्थं वसन्तवर्णनम् अतीव मनोहरम्।

कालिदासकृतिषु साकल्येन उपलभ्यमानं मधोः चित्रं पश्यामस्तावत्। वसन्तःत्रिभुवनाधिपस्य मदनस्य सामन्तः वयस्यश्च। दिग्विजयाय जिगमिषुणा सुमशरसार्वभौमेन आदौ स्वसामन्तः वसन्त एव प्रेषितः समराङ्गणं प्रति। अतः प्रफुल्लचूताङ्कुरतीक्ष्णसायकोऽसौ

—शेषं ६ पुटे

Scanned by CamScanner

# मौन मूलिका

एकस्मिन् ग्रामे कौचित् दम्पती आस्ताम्। तौ उभावपि दम्पती प्रतिदिनं वाचा कलहं कुरुतः स्म। येन-केनापि वा कारणेन महानेव विवादः भवति स्म। एकदा सा स्त्री एकस्य वैद्यस्य समीपे गत्वा "वैद्यराज मम पतिः शीघ्रकोपी असहिष्णुप्रकृतिः कलहप्रियः निन्दकस्वभावश्च वर्तते। तेन नित्यं गृहे आवयोः कलहः भवति। तदर्थं किमपि औषधं दीयताम्" इति अवदत्। तदा वैद्यः तस्यै एकां कूपिकामापूर्य द्रवरूपम् औषधं प्रदाय "यदा तव पतिः त्वया सह कलहं प्रारभते तदा अनेन औषधेन तव मुखम् आपूर्य स्वस्थमुपविश। तेन तस्य कोपः स्वयमेवशांतो भविष्यति" इति अकथयत्। तया च तथा कृते तस्याः पत्युः कोपः शान्त एव अभवत्। कलहाः अपि क्रमेण विरला एव अभवन्। अन्ते च तयोः अन्योन्यप्रेम प्रवृद्धमभवत्। एकदा सा तं वैद्यमपृच्छत् "वैद्यराज तव औषधमहिम्ना सरसम् अद्य आवयोर्दाम्पत्यम्। किमासीत् औषधे?" तदा वैद्यः सहासमवदत् मदीये तस्मिन् औषधे "दम्पत्योः कलहज्वालाशमनी मौनमूलिका" आसीत् इति

# अक्रोधः तपसः फलम्

एकदा केचन निरुद्योगिनः जनाः मिलित्वा एवं प्रकटयामासुः यत् "साधुपुरुषं एकनाथमहाराजं यः प्रकोपयेत् तस्मै शतं मुद्राः दीयन्ते" इति। तत्र कश्चन धूर्तः "अहं तं कोपयिष्यामीति प्रतिज्ञां कृत्वा एकनाथ साधोः समीपं आगतः। तदा एकनाथः देवपूजायां मग्नः आसीत्। तदायं धूर्तः पादत्राणसहित एव देवगर्भागारं गत्वा एकनाथस्य अङ्के उपाविशत्। देवस्य नैवेद्यार्थं स्थापितानि कदलीफलानि भक्षयितुं प्रारभत च। तदा सः साधुशिरोमणिः "अतिथिमहाशय केवलं कदलीफलानि नैव रोचकानि भवेयुः। अतः इमां शर्करां लेपय" इति तत्रैव स्थितं शर्करासम्पुटमुद्घाट्य तस्य पुरःन्यक्षिपत्। तदा सः धूर्तः "अहो विफल एव मम अयं प्रयत्नः। यत् किमपि वा कृतं चेदपि नायं क्रोधवशः भवति। मम तु रूप्यकशतकस्य तीव्रतरा आशा अस्ति। तत् किमत्र कार्यम् इति विचारयन् आसीत्।

मध्यान्हे भोजनवेलायां एकनाथस्य पत्नी परिवेषणार्थम् आगता। यदा सा आगता भूत्वा परिवेषयतिस्म तदा अयं धूर्तः उत्प्लुत्य तस्याः पृष्ठम् आरूढः। सः अमन्यत यत् अनेन मम दुर्व्यापारेण एकनाथः नूनं क्रुध्दो भवेदेव इति। परन्तु तदा अपि शान्तःएकनाथः पत्नीं प्राह "प्रिये तव पृष्ठतटम् आरूढः सः अतिथिः यथा अधः न पतेत् तथा दक्षतां गृहाण" इति। तदा सापि तत्पात्नी शान्तस्वरेण आह "न भेतव्यम् नभेतव्यम्। न कदाचिदपि तं अधःपातयामि। मम तु पुत्रं पृष्ठम् आरोप्य गृहकार्यकरणस्य अभ्यास एव अस्ति। अतः अमुमपि शिशुं कथं अहम् अधः पातयामि? इति। तत्श्रुत्वा सः धूर्तः पश्चात्तापेन तयोः पादयोः पतित्वा क्षमाम् प्रार्थितवान्।

—

—५ पुटतः अनुवृत्तम्

वीरः युवकयुवतीनां मनांसि वेध्दुं समुपस्थितः। तदनन्तरं घोषणकार्ये नियोजिताः चूतासवदानेन आदौ एव सन्तोषिताः मदनसेवकाः पिकाः आगत्य प्रचुरमघोषयन् यथा "त्यजत मानमलं बत विग्रहैः न पुनरेति गतं चतुरं वयः"। वसन्तो यदा त्रिभुवने पदम् अकरोत्तस्मिन्नेव क्षणे सर्वे पुष्पद्रुमाः विना दोहदपूरणम् कुसुमानि असुवन्त। अत एव मधुकराणाम् अधुना मधुपानोत्सवः हृदयंगमसङ्गीतभङ्गीमनोरमः समारब्धः। विरहपीडितानां कामिनामङ्गानि मलयवातो मन्दमन्दम् अस्पृशत्। वनश्रीः चिरकालं विरहानलदग्धा आसीत्। अधुना तु समाप्ता अस्याः प्रोषितभर्तृकावस्था। अतः

शेष ८ पुटे —

Scanned by CamScanner

## मञ्जूषामणयः

# कुमारसम्भवपाठ-विमर्शः

( श्रीक्षितीशचन्द्र-चट्टोपाध्यायः )

सहृदयाः, विदितमेवैतद्भवतां यत् कुमारसम्भव-समाख्ये काव्यरत्ने कविकुलचूडामणिना कालिदासेन वैदिकं त्रियम्बकपदं प्रायोजीति। तथाहि तत्र तृतीय-सर्गस्य ४४ तमः श्लोकः—

स देवदारुद्रुमवेदिकायां
शार्दूलचर्मव्यवधानवत्याम्।
आसीनमासन्नशरीरपात-
स्त्रियम्बकं संयमिनं ददर्श ॥३॥ ४४

इति। अत्रारुणगिरिनाथेनोक्तम् — त्रियम्बकमिति यणादेशे प्राप्तेऽपि छन्दोभङ्गे छन्दोविचितिकारैरियङुव-ङादेशस्योक्तत्वादियङादेशः। प्रपञ्चितं चेदं नारायणेन —त्रियम्बकमित्यत्र यणादेशे प्राप्ते छन्दोभङ्गप्रसङ्गे छन्दोविचितिकारैरियङुवङादेशयोर्विहितत्वादियङादेशः। 'त्रियम्बकान्नान्यमुपास्थितासौ '* इति भर्तृहरिप्रयोगाच्च नायं दोष इति। मल्लिनाथ-सूरिणाप्युक्तम् —" त्र्य-म्बकमित्युक्ते पादपूरणव्यत्यासात् त्रियम्बकमिति पाद-पूरणार्थोऽयमियङादेशश्छान्दसः, महाकविप्रयोगादभियु-क्तैरङ्गीकृतः। केचित् साहसिकाः त्रिलोचनमिति पेठुः। " इति। रामगोविन्दसिद्धान्तवागीशेन " तं त्र्यम्बकम् " इति पाठोऽङ्गीकृतः। अयमेव पाठश्चारित्र-वर्धनस्यापि सम्मतः।

अत्र च प्रयोगे बीजं " त्रियम्बकं यजामहे " इति प्रसिद्धतमो मन्त्र इति प्रतिभाति। " अचि श्नु-धातु-भ्रुवां य्वोरियङुवङौ " [६-४-७७] इति सूत्रे वार्तिकम् — " इयङादिप्रकरणे तन्वादीनां छन्दसि बहुलम् " इति। तत्र च भाष्यम्—" तन्वं पुषेम। तनुवं पुषेम। विष्वं पुषेम। विषुवं पुषेम। त्र्यम्बकं यजामहे। त्रियम्बकं यजामहे " इति।

---

# घटिकायन्त्रम्

प्रारब्धः पूजावकाशः। वामदेवेन कलिकातातो मेदिनीपुरे स्वगृहं प्रस्थितम्। धूमशकटे काष्ठासने निषण्णोऽसौ वृत्तान्तपत्रं वाचयति। तस्यैव काष्ठा-सनस्यापरस्मिन् प्रान्ते कश्चन रमणीयदर्शनस्तरुणो निरन्तरं शिरः सञ्चालयन् टिक् टिक् टिक् टिक् टिक् टिक् टिक् टिक् इति वदन्नास्ते। कियताश्चित् कालाद-नन्तरं नितरामुद्वेजितो वामदेवो युवानमवदत्, महा-भाग, कामं स्वाधीनेऽस्मिन् भारते वर्षे सर्वेषामेव वचनेऽनुष्ठाने च स्वातन्त्र्यं वर्तते, अत एव भवतापि यत्किञ्चिदपि वक्तुं शक्यते। तथाप्यनवरतं टिक् टिक् शब्देन खिद्यते मे श्रवणयुगलम्। न चेद्रहस्यं श्रोतु-मिच्छामि किमिति भवतैवमाचर्यते इति।

तरुणेनोक्तम्—टिक् टिक् टिक् टिक् अहं तावद् घटिकायन्त्रम्। टिक् टिक् टिक् टिक्।

उच्यतां तर्हि कः कालोऽयमिति।

—षड्वादनतो दश निमेषा अवशिष्यन्ते।—

वामदेवेन मणिबन्धस्थितं घटिकायन्त्रं निरीक्ष्यो-क्तम्, नहि नहि पञ्चैव निमेषा अवशिष्यन्त इति।

अहो मन्दगमनोऽसि संवृत्तः! टिक्टिक्टिक्टिक् टिक्टिक्टिक्......।

---

Scanned by CamScanner

## कुलपतिः

श्री. मुकुंदराव रामराव जयकर, एम्. ए. एल्. एल्. बी
बार अॅट लॉ डी. सी एल् पी. सी.

### चिरं जीयात् स्ववर्ग् जयकर मुकुन्दो जयकरः

मुम्बापुर्यां मलबारगिरौ स्थिते भव्ये प्रासादे वसन् महानुभावः कस्य न परिचितः। आबालवृद्धाः सर्वे तं जानन्ति एव। बालानां पिता युवकानां मार्गदर्शकः वृद्धानां सहायकः इति विविधैः प्रकारैः परिचितः असौ सर्वैः जनैः। विद्वानपि विनीतः धनवान् अपि धनमदरहितः स्वाधिकारे सदैव जनहृदयं कर्षत्येव। उभाभ्यां प्राच्यांग्लविद्याभ्यां विभूषितः असौ १९३६ क्रिस्ताब्दे सार्वजनिकजीवनं आरब्धवान्। उत्तरोत्तरं बुद्धिप्रकर्षेण १७२३ क्रिस्ताब्दे न्यायसंसदि सदस्यत्वेन संमतः। ततः अनेकाधिकारपरंपरया १७३० अब्दे लंडनपुरीं ययौ। १७३७ अब्दे सर्वोच्चन्यायालये न्यायप्रमुखः इति नियोजितः। १९३७ अब्दे लंडननगर्यां "प्रीव्वीकौन्सिल" नाम न्यायदानमण्डळस्य सभासदस्त्वेन गौरवितः असौ। किन्तु १९४२ अब्दे राजकारणेन तां पदवीं तत्याज। नरपति–हितकर्ता च जनपति–हितकर्ता इति उभयकार्यकुशलः जनः विरलः एव। किन्तु स्वार्थत्यागेन च असामान्यं जनहितं साधितं अनेन। पुण्यपत्तनस्य महाविश्वविद्यालयस्य प्रथम उपकुलगुरुः असौ। अस्य प्रयत्नेन, उदारत्वेन, जनप्रियत्वेन पुण्यपत्तन महाविश्वविद्यालयस्य प्रकर्षः दृश्यते।

अयं च पुण्यपत्तनस्थः विश्वविद्यालयः नालन्दा तक्षशिला, विक्रमशिलादिप्राचीन विश्वविद्यालयवत् जगति एव अत्यपूर्वम् आदर्शविद्याकेन्द्रं भवेदिति अस्य अत्युत्कटा इच्छा। एतद्विद्यापीठमुखान्तरं "एतद्देशप्रसूतस्य सकाशादग्रजन्मनः। स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः" इति मानवकुलमूलपुरुषस्य मनोः चिरन्तनाकांक्षां सफलयितुं सत्यापयितुं च विश्वसाहसं भगीरथप्रयत्नांश्च कुर्वन्नेवास्ते निस्पृहः निस्वार्थः अनलसश्चायं महाराष्ट्रमहर्षिः। संस्कृत भाषायां अस्य प्रभुत्वं प्रेम अभिमान आदरश्च वर्णनातीत एव। अत एव इतः परं पुणेविश्वविद्यालयस्य सर्वेऽषामपि दीक्षान्त समारम्भाणां कार्यकलापाः संस्कृतभाषयैव निर्वर्तनीया इति सधैर्यं निर्णीतमनुष्ठितं च तथैव अस्मिन् वर्षे। १९२४ क्रिस्ताब्दे अनेन महाशयेन संपादितः वेदान्त-तत्व-ग्रन्थः सर्वाणां चिरपरिचितः एव। भारतस्य सौभाग्यं विधातुं चिरायुः भवतु अयं कलियुगबृहस्पतिः

ठि०

—६ पुटतः अनुवृत्तम्

सा मुखप्रसाधनविधौ सादरा जाता। अशोकपल्लवः अस्याः ओष्ठरागः। तिलकवृक्षाः तिलकः। कुरबकश्च पत्रविशेषकः शीघ्रमागतो वसन्तः। पश्चाच्च रहसि संजाता दूतयोः द्वयोः स्मरकथाः। तथापि पलाशरूपैः नखक्षतैः स्फोटितं तयोः शृङ्गारगौप्यम्। एकस्य दाम्पत्यस्य शृङ्गारः सर्वेषामपि–मानवानामितरेषां वा जन्तूनां चित्तानि काष्ठागतस्नेहरसानुविद्धानि अकरोत्।

न खलु तद्विस्मयभाजनं यद् एतादृशस्य वसन्तस्य आगमनात् प्रभृत्येव शिवतपोवननिवासिनः मुनयः अपि कथंचिदेव स्वात्मनामीशा बभूवुः।

( "अर्घ्यम्" सौजन्यात् )

Edited & Printed By- P. K. Galagali at Chandrika Printing Works & Published by him at *Vaijayanti Karyalaya Yogamandir*, *Bagalkot*, Dist:- Bijapur.

Scanned by CamScanner